[1]रेवती, [2]रेणुः, [3]रेतः इतीमानि रूपाण्यस्मात् भवन्तीति विशेषः ।

(1412) "रु शब्दे" (II-अदादिः-1034. अक. सेट्. पर.)

'—रवते रौति शब्दने ॥' (श्लो. 23) इति देवः ।

रावकः-विका, रावकः-विका, [4]रुरूषकः-[5]रिरावयिषकः-षिका, रोरूयकः-यिका; रविता-त्री, रावयिता-त्री, रुरूषिता-रिरावयिषिता-त्री, रोरूयिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि आदादिकक्ष्णौतिवत् (323) बोद्धव्यानि । [6]रवणः, [7]संरावः,[A] [8]रवः, [9]रावः, [B]अल्परावः, मञ्जुरावः, [10]आरावः-आरवः, [11]मयूरः,

---

1. कर्तरि क्विप्प्रत्यये, तदन्तात् मतुपि, उगित्त्वेन स्त्रियां ङीपि च **रेवती** इति सिद्ध्यति ।

2. 'अजिवृरीभ्यो निच्' [द. उ. 1-148] इति णुप्रत्ययः ।

3. '**स्रुरीभ्यां तुट् च**' [द. उ. 9-62] इति असुन्प्रत्यये तुगागमे च रूपम् ।

4. धातोरस्य सेट्त्वेऽपि, 'सनि ग्रहगुहोश्च' (7-2-12) इतीण्निषेधः । '**इको झल्**' (1-2-9) इति झलादिसनः कित्त्वम् । 'अज्झनगमां सनि' (6-4-16) इति दीर्घः । षत्वम् । एवं सन्नन्ते सर्वत्र प्रक्रियोह्या ।

5. ण्यन्तात् सनि, 'ओः पुयण्ज्यपरे' (7-4-80) इति अभ्यासस्येकारः ।

6. तच्छीलादिषु कर्तृषु, 'चलनशब्दार्थादकर्मकात्—' (3-2-148) इति युच् । णत्वम् । **क्षीरस्वामी** तु औणादिके 'सुयुरुवृञो **युच्**' [द. उ. 5-20] इति युच्प्रत्यये निष्पादितवान् ।

7. '**उपसर्गे रुवः**' (3-3-22) इति घञ् । उवर्णान्तत्वप्रयुक्तापोऽपवादः ।

8. अनुपसृष्टात् (शुद्धात्) '**ऋदोरप्**' (3-3-57) इति अप्प्रत्ययः ।

9. 'बाहुलकाद् घञपि, इत्यात्रेयः । **रावः** ।' इति **माधवधातुवृत्तिः** । "—'कृत्यल्युटो बहुलम्' (3-3-113) इत्यनेन घञबादयः । बहुलं व्यतिकीर्यन्ते मञ्जुरावादयस्तथा ॥" इति **प्रक्रियासर्वस्व**श्लोक इहावधेयः ।

10. '**विभाषाऽऽङि रुप्लुवोः**' (3-3-50) इति घञ्विकल्पः । तेन पक्षेऽप्प्रत्ययः ।

11. मह्यां रौतीति **मयूरः** । 'अन्येष्वपि दृश्यते' (3-2-101) इति डप्रत्यये पृषोदरादिषु (6-3-109) पाठात् महीशब्दस्य 'मयू' इत्यादेशे च रूपमेवम् ।

A. 'सजलाम्भोदसंरावं हनुमन्तं सहाङ्गदम् ।' भ. का. 7.35.

B. 'केऽप्यल्परावं नुनुवुः खलेषु क्षुरक्ष्णुतात्मानममुं स्नुताक्षाः ।' धा. का. 2.47.